833

श्रीः ।

शिवहरराजधानीपति-

श्रीराजादेवनन्दनसिंहबहादूरनराधिप-

संगृहीतविरचित-

शाक्तप्रमोदान्तर्गतं

नवमं

मातङ्गीतन्त्रम् ।

उक्तराजगुरुवर्यपण्डितश्रीरघुराज-

दुबेजीद्वारा संशोधितम् ।

तदेतत्

खेमराज श्रीकृष्णदासश्रेष्ठिना

मुम्बय्यां

स्वकीये "श्रीवेङ्कटेश्वर" (स्टीम्) यन्त्रागारे

मुद्रयित्वा प्रकाशितम् ।

तृतीयावृत्तिः ।

अस्य ग्रन्थस्य पुनर्मुद्रणाधिकाराः १८६७ वार्षिक २५ तमराज

नियमानुरोधेन प्रकाशकाधीनाः सन्ति ।

अथ मातङ्गीध्यानम्

श्रीगणेशाय नमः ।

अथ शाक्तप्रमोदः ।

अथ मातङ्गीतन्त्रम् ।


अथमातङ्गीध्यानम् ।

श्यामाङ्गीं शशिशेखरान्त्रिनयनां रत्नासिंहासनस्थिताम् ॥
वेदैर्ब्बाहुदण्डैरसिखेटकपाशाङ्कुशधराम् ॥



अथयन्त्रोद्धारः ।

षट्कोणाष्टदलम्पद्मँल्लिखेद्यन्त्रम्ममनोरमम् ॥
तत्रपूजाप्रकर्त्तव्याजवापुष्पेणमन्त्रवित् ॥



अथमन्त्रोद्धारः ।

प्रणवश्चततोमायाङ्कामबीजश्चकूर्च्चकम् ॥
मातङ्गीङेयुताचास्त्रँवह्निजायावधिर्म्मनुः ॥

अथमन्त्रः ।

ॐह्रीक्लीँहूँमातङ्ग्यैफट्स्वाहा ।

अथपूजाविधिः ।

अथवक्ष्येमहादेवीम्मातङ्गींसर्व्वसिद्धिदाम्॥ अस्याऽपूजनमात्रेणवाक्सिद्धिँल्लभतेध्रुवम् ॥ प्रणवश्चततोमायाङ्कामबीजश्चकूर्च्चकम् ॥ मातङ्गीङेयुताचास्त्रँवह्निजायावधिर्म्मनुः ॥ ऋषिरस्यदक्षिणामूर्त्तिर्विराट्छन्दऽप्रकीर्त्तितम् ॥ मातङ्गीदेवतादेवी सर्व्वसिद्धिप्रदायिनी ॥अङ्गन्यासकरन्यासौकुर्य्यान्मन्त्रीसमाहितः॥षड्दीर्घभाजाबीजेन प्रणवाद्येनकल्पयेत् ॥ षट्कोणाष्टदलम्पद्मँल्लिखेद्यन्त्रम्ममनोरमम् ॥तत्रपूजाप्रकर्त्तव्या जवापुष्पेणमन्त्रवित् ॥ अष्टशक्तीश्चाष्टदलेपूजयेत्सुसमाहितः ॥रतिऽप्रीतिर्म्मनोभवा क्रियाशुद्धाचशक्तयः ॥ अनङ्गकुसुमानङ्गमदनामदनाल

सा ॥ इत्यष्टशक्तीःसम्पूज्य उपहारसमन्वितः ॥ ततोदेवीम्परां ध्यायेत्साधकःस्थिरमानसः ॥ श्यामाङ्गीशशिशेखरान्त्रिनयनां रत्नसिंहासनस्थिताम् ॥ वेदैर्बाहुदण्डैरसिखेटकपाशाङ्कुशवराम् ॥ एवन्ध्यात्वामहादेवीङ्गन्धपुष्पैर्म्मनोरमैः ॥नैवेद्यन्तुमहादेव्यैपाय संशर्क्करान्वितम् ॥ पुरश्चरणकालेतुषट्सहस्रंमनुञ्जपेत् ॥ तद्दशांशंहुनेदाज्यैः शर्क्करामधुभिःसह ॥ ब्रह्मवृक्षोद्भवैःकाष्ठैःसाधकः शक्तिभिः सह ॥ एवंपुरस्क्रियाङ्कृत्वा प्रयोगविधिमाचरेत् ॥ चतुष्पथेश्मशानेवा कलामध्येचमान्त्रिकः ॥ मत्स्यम्मांसम्पायसञ्च दद्याद्धूपञ्चगुग्गुलुम् ॥ रात्रियोगेनकर्त्तव्यं सदापूर्ण्णश्चसाधकः ॥ एवम्प्रयोगमात्रेण कविताजायतेध्रुवम् ॥ अग्निस्तम्भञ्जलस्तम्भं व्वाक्स्तम्भङ्कारयेद्ध्रुवम् ॥ मन्त्रीजयतिशत्रूंश्च ताक्ष्यौभोगिकुलय्यथा ॥ शास्त्रेवादेकवित्वेच बृहस्पतिरिवापरः ॥ अनेनैवविधानेन मातङ्गीसिद्धिदायिनी ॥ नूनन्तद्गृहमागत्य कुबेरैर्द्दीयतेवसु॥ विनामत्स्यैर्विनामांसैर्न्नार्च्चयेत्परदेवताम् ॥ इतितन्त्रसारः ॥

अथ मातङ्गीस्तोत्रम्।

ईश्वरउवाच ॥ आराध्यमातश्चरणाम्बुजेते ब्रह्मादयोविस्तृतकीर्त्तिमापुः ॥ अन्येपरञ्चाविभवम्मुनीन्द्राः परांश्रियंभक्तिपरेणचान्ये ॥ १ ॥ नमामिदेवीन्नवचन्द्रमौलेर्म्मातङ्गिनीञ्चन्द्रकलावतंसाम्॥आम्नायप्राप्तिप्रतिपादितार्त्थम्प्रबोधयन्तीम्प्रियमादरेण॥२॥विनम्रदेवस्थिरमौलिरन्तैर्व्विराजितन्तेचरणारविन्दम् ॥ अकृत्रिमाणाञ्चवचसाँविशुद्धम्पदाम्पदंशिक्षितनूपुराभ्याम् ॥ ॥ ३ ॥ कृतार्त्थयन्तीम्पदवीम्पदाभ्यामास्फालयन्तीङ्कलवल्लकीन्ताम् ॥ मातङ्गिनींसद्धृदयान्धिनोमि लीलांशुकांशुद्धनितम्बबिम्बाम् ॥४॥तालीदलेनार्प्पितकर्णभूषाम्माध्वीमदोद्भूर्णितनेत्रे

त्रपद्माम् ॥ घनस्तनींशम्भुवधून्नमामितडिल्लताकान्तिमनग्घ्यं भूषाम् ॥ ५ ॥ चिरेणलक्ष्यान्नवलोमराज्यां स्मरामिभक्त्याजगतामधीशे ॥ वलित्रयाढ्यन्तवमध्यमम्व नीलोत्पलांशुश्रियमावहन्तीम् ॥ ६ ॥ कान्त्याकटाक्षैरकमलाकराणाङ्कदम्बमालाश्चितकेशपाशाम् ॥ मातङ्गकन्यांहृदिभावयामि ध्यायेयमारक्तकपोलविम्बम् ॥ ७ ॥ बिम्बाधरन्यस्तलालामवश्यमालोललीलालकमायताक्षम्॥ मन्दस्मितन्तेवदनम्महेशिस्तुत्यानयाशङ्करधर्म्मपत्नीम् ॥ ८ ॥ मातङ्गिनीव्वांगाधिदेवतान्तांस्तुवन्तियेभक्तियुतामनुष्याः ॥ परांश्रियन्नित्यमुपाश्रयन्ति परत्रकैलासतले वसन्ति ॥ ९ ॥ इतिरुद्रयामलेमातङ्गीस्तोत्रंसमाप्तम्॥

अथ मातङ्गीकवचम् ।

श्रीदेव्युवाच ॥ साधुसाधुमहादेवकथयस्वसुरेश्वर ॥मातङ्गीकवचन्दिव्यंसर्व्वसिद्धिकरन्नृणाम् ॥ १ ॥ श्रीईश्वरउवाच ॥ शृणुदेविप्रवक्ष्यामिमातङ्गीकवचंशुभम् ॥ गोपनीयम्महादेविमौनीजापंसमाचरेत् ॥ २ ॥ अस्यश्रीमातङ्गीकवचस्यदक्षिणामूर्त्तिर्ऋषिर्व्विराट्छन्दोमातङ्गीदेवताचतुर्व्वर्ग्गसिद्धयेविनियोगः ॥ ॐशिरोमातङ्गिनीपातुभुवनेशीतुचक्षुषी ॥ तोडलाकर्ण्णयुगलन्त्रिपुरावदनम्मम ॥ ३ ॥ पातुकण्ठेमहामायाहृदिमाहेश्वरीतथा ॥ त्रिपुष्पापाश्र्ववयोरपातुगुदेकामेश्वरीमम ॥ ४ ॥ ऊरुद्वयेतथाचण्डीजङ्घयोश्चहरप्रिया ॥ महामायापादयुग्मेसर्व्वाङ्गेषुकुलेश्वरी ॥ ५ ॥ अङ्गम्प्रत्यङ्गकञ्चैवसदारक्षतुवैष्णवी ॥ ब्रह्मरन्ध्रेसदारक्षेन्मातङ्गीनामसंस्थिता ॥ ६ ॥ ललाटेरक्षयेन्नित्यम्महापिशाचिनीतिच ॥ नेत्राभ्यांसुमुखीरक्षेद्देवीरक्षतुनासिकाम् ॥ ७ ॥ महापिशाचिनीपायान्मुखेरक्षतुसर्व्वदा ॥ लज्जारक्षतुमान्दन्ते

चोष्ठौसम्मार्ज्जनीकरी ॥ ८ ॥ चिबुकेकण्ठदेशेतुचकारत्रितयम्पुनः ॥ सविसर्ग्गम्महादेवीहृदयम्पातुसर्व्वदा ॥ ९ ॥ नाभिरक्षतुमालोलाकालिकावतुलोचने ॥ उदरेपातुचामुण्डालिङ्गेकात्यायनीतथा ॥ १० ॥ उग्रतारागुदेपातुपादौरक्षतुचाम्बिका ॥ भुजौरक्षतुशर्व्वाणीहृदयञ्चण्डभूषणा ॥ ११ ॥ जिह्वायाम्मातृकारक्षेत्पूर्व्वेरक्षतुपुष्टिका ॥ विजयादक्षिणेपातुमेधारक्षतुवारुणे ॥ १२ ॥ नैर्ऋत्यांसुदयारक्षेद्वायव्याम्पातुलक्ष्मणा ॥ ऐशान्यांरक्षयेद्देवीमातङ्गीशुभकारिणी ॥ १३ ॥ रक्षेत्सुरेशाचाग्नेयेबगलापातुचोत्तरे ॥ ऊर्द्ध्वम्पातुमहादेवीदेवानांहितकारिणी ॥ १४ ॥ पातालेपातुमान्नित्यंव्वशिनीविश्वरूपिणी ॥ प्रणवञ्चततोमायाकामबीजञ्चकूर्च्चकम् ॥ १५ ॥ मातङ्गिनीङेयुतास्त्रंव्वह्निजायावधिर्म्मनुः ॥ सार्द्धैकादशवर्ण्णासासर्व्वत्रपातुमांसदा ॥ १६ ॥ इतितेकथितन्देविगुह्याद्गुह्यतरम्परम् ॥ त्रैलोक्यमङ्गलन्नामकवचन्देवदुर्ल्लभम् । ॥ १७ ॥ यइदम्प्रपठेन्नित्यञ्जायतेसम्पदालयम् ॥ परमैश्वर्य्यमतुलम्प्राप्नुयान्नात्रसंशयः ॥ १८ ॥ गुरुमभ्यर्च्चयविधिवत्कवचम्प्रपठेद्यदि ॥ ऐश्वर्य्यंसुकवित्वञ्चवाक्सिद्धिँल्लभतेध्रुवम् ॥ १९ ॥ नित्यन्तस्यतुमातङ्गीमहिलामङ्गलञ्चरेत् ॥ ब्रह्माविष्णुश्चरुद्रश्चयेदेवाःसुरसत्तमाः ॥ २० ॥ ब्रह्मराक्षसवेतालग्रहाद्याभूतजातयः ॥ तन्दृष्ट्वासायकन्देविलज्जायुक्ताभवन्तिते ॥ २१ ॥ कवचन्धारयेद्यस्तुसर्व्वसिद्धिँल्लभेद्ध्रुवम् ॥ राजानोऽपिचदासत्वंषट्कर्म्माणिचसाधयेत् ॥ २२ ॥ सिद्धोभवतिसर्व्वत्रकिमन्यैर्ब्बहुभाषितैः ॥ इदंकवचमज्ञात्वामातङ्गीन्योभजेन्नरः ॥ २३ ॥ अल्पायुर्निर्द्धनोमूर्खोभवत्येवनसंशयः ॥ गुरौभक्तिःसदाकार्य्याकवचेचदृढामतिः ॥ २४ ॥ तस्मैमातङ्गिनीदेवीसर्व्वसिद्धिम्प्रयच्छति ॥ २५ ॥ इतिनन्द्यावर्त्तेउत्तरखण्डेत्वरितफलदायिनीमातङ्गिनीकवचंसमाप्तम् ॥

अथहृदयम् ।

एकदाकौतुकाविष्टाभैरवंभूतसेवितम् ॥ भैरवीपरिपप्रच्छसर्व्व भूताहितेरता ॥ १ ॥ श्रीभैरव्युवाच ॥भगवन्सर्व्वधर्म्मज्ञभूतवात्स ल्यभावन ॥ अहंवेदितुमिच्छामि सर्व्वभूतोपकारकम् ॥ २ ॥ केनमन्त्रेणजप्तेनस्तोत्रेणपठितेनच ॥ सर्व्वथाश्रेयसाम्प्राप्तिर्भू तानाम्भूतिमिच्छताम् ॥ ३ ॥ श्रीभैरवउवाच ॥ शृणुदेवितवस्नेहात्प्रायोगोप्यमपिप्रिये ॥ कथयिष्यामितत्सर्व्वं सुखसम्पत्करंशु भम् ॥ ४ ॥ पठतांशृण्वताञ्चित्यंसर्व्वसम्पत्तिदायकम् ॥ विद्यै श्वर्य्यसुखावाप्तिमङ्गलप्रद्मुत्तमम् ॥ ५ ॥ मातङ्ग्याहृदय स्तोत्रं दुःखदारिद्र्यभञ्जनम् ॥ मङ्गलम्मङ्गलानाञ्चअस्तिसर्व्वसु खप्रदम् ॥ ६ ॥ ॐअस्यश्रीमातङ्गीहृदयस्तोत्रमन्त्रस्यदक्षिणामू र्त्तिऋषिर्व्विराट्छन्दोमातङ्गीदेवताह्रींबीजंहूँशक्तिःक्लींकींलकंस र्व्ववाञ्छितार्थसिद्ध्येपाठेविनियोगः ॥ अथाङ्गन्यासः ॥ ॐह्रीं हृदयायनमः ॐक्लींशिरसेस्वाहा ॐहूँशिखायैवषट् ॐह्रीं नेत्रयायवौषट् ॐक्लींकवचायहूम् ॐहूँअस्त्रायफट् ॥ एवंक रन्यासः ॥ अथध्यानम् ॥ श्यामांशुभ्रांशुभालान्त्रिकमलनय नां रत्नसिंहासनस्थाम्भक्ताभीष्टप्रदात्रींसुरनिकरकरासेव्यकञ्जा ङ्घ्रियुग्माम् ॥ नीलाम्भोजांशुकान्तिन्निशिचरनिकरारण्यदा वाग्निरूपाम्पाशाङ्कुङ्गश्चतुर्भिर्व्वरकमलकरैःखेटकञ्चाङ्कुशञ्च ॥ मातङ्गीमावहन्तीमभिमतफलदाम्मोदिनीञ्चिन्तयामि ॥ ७॥ नमस्तेमातङ्ग्यैमृदुमुदिततन्वै तनुमताम्परश्रेयोदायैकमलचर णध्यानमनसाम् ॥ सदासंसेव्यायैसदसिविबुधैर्दिव्यविपणैर्द्या द्रायैदेव्यैदुरितदलनोद्दण्डमनसे ॥ ८ ॥ परम्मातस्तेयोजप तिमनुमेवोग्रहृदयः कवित्वङ्कल्पानाङ्कलयतिसुकल्पःप्रतिपद म् ॥ अपिप्रायोरम्यामृतमयपदातस्यललितानटीम्मन्यावाणीन

टतिरसनायाश्चपलिता ॥ ९ ॥ तवध्यायन्तोयेवपुरनुजप
न्तिप्रवलितं सदामन्त्रम्मातर्न्नहिभवतितेषाम्परिभवः ॥ कद
म्बानाम्माल्यैश्शिर अपिचयुञ्जन्तियदिये भवन्तिप्रायस्तेयुव
तिजनयूथस्ववशगाः ॥ १० ॥ सरोजैस्साहस्रैस्सरसिजपदद्वन्द्वम
पिये सहस्रन्नामोक्तातदपितवडेऽन्तम्मनुमितम् ॥ पृथङ्नाम्नातेना
युतकलितमर्च्चन्तिप्रसुते सदादेवव्रातप्रणमितपदाम्भोजयुगला
॥ ११ ॥ तवप्रीत्यैमातर्द्ददतिबलिमाधायबलिनासमस्तस्यम्मां
सञ्चासुरुचिरसितंराजरुचितम् ॥ सुपुण्यायेस्वान्तस्तवचरणप्रेमै
करसिका अहोभाग्यन्तेषान्त्रिभुवनमलंवश्यमखिलम् ॥ १२ ॥
लसल्लोलश्रोत्राभरणकिरणक्रान्तिकलितम्मितस्मित्यापन्नप्रति
भितममन्नंविकरितम् ॥ मुखाम्भोजम्मातस्तवपरिलुठद्भृमधुकरं
रमायेध्यायन्तित्यजतिनहितेषांसुभवनम् ॥ १३ ॥ परः
श्रीमातङ्ग्याजपतिहृदयाख्यस्सुमनसामयंसेव्यस्सद्योभिमतफ
लदश्चातिललितः ॥ नरायेशृण्वन्तिस्तवमपिपठन्तीममनिशन्न
तेषान्दुःप्राप्यञ्जगतियदलभ्यन्दिविषदाम्॥ १४ ॥धनार्थीधनमा
प्नोति दारार्थीसुन्दरीम्प्रियाम् ॥ सुतार्थीलभतेपुत्रंस्तवस्यास्य
प्रकीर्त्तनात्॥ १५॥विद्यार्थीलभतेविद्याँव्विविधाँव्विभवप्रदाम् ॥
जयार्थीपठनादस्य जयम्प्राप्नोतिनिश्चितम् ॥ १६ ॥ नष्टरा
ज्योलभेद्राज्यं सर्व्वसम्पत्समाश्रितम् ॥ कुवेरसमसम्पत्तिः स
भवेद्धृदयम्पठन् ॥ १७॥ किमत्रबहुनोक्तेनयद्यदिच्छतिमानवः॥
मातङ्गीहृदयस्तोत्रपाठात्तत्सर्व्वमाप्नुयात् ॥ १८ ॥ इतिश्री
दक्षिणामूर्तिसंहितायांश्रीमातङ्गीहृदयस्तोत्रंसमाप्तम् ॥

अथशतनामस्तोत्रम् ।

श्रीभैरव्युवाच ॥ भगवञ्छ्रोतुमिच्छामि मातङ्ग्याःशतना

मकम् ॥ यद्गुह्यंसर्व्वतन्त्रेषुकेनापिनप्रकाशितम् ॥ १ ॥ श्रीभैर वउवाच ॥ शृणुदेविप्रवक्ष्यामि रहस्यातिरहस्यकम् ॥ नाख्ये यय्यँत्रकुत्रापि पठनीयम्परात्परम् ॥ २॥ यस्यैकवारपठनात्सर्व्वे विघ्नाउपद्रवाः ॥ नश्यन्तितत्क्षणादेवि वह्निनातूलराशिवत्॥३॥ प्रसन्नाजायतेदेवी मातङ्गीचास्यपाठतः ॥ सहस्रनामपठनेयत्फ लम्परिकीर्त्तितम् ॥ ४ ॥ तत्कोटिगुणितन्देवि नामाष्टशतकंशुभ म् ॥ अस्यश्रीमातङ्गीशतनाम्नाम्भगवान्मतङ्गऋषिरनुष्टुप्छन्दो मातङ्गीदेवतामातङ्गीप्रीतयेजपेविनियोगः ॥ महामत्तमातङ्गिनी सिद्धिरूपा तथायोगिनीभद्रकालीरमाच ॥ भवानीभयप्रीतिदाभू तियुक्ताभवाराधिताभूतिसम्पत्करीच ॥ जनाधीशमाताधनागार दृष्टिर्द्धनेशार्च्चिताधीरवापीवरांगी ॥ प्रकृष्टाप्रभारूपिणीकामरूपा प्रहृष्टामहाकीर्त्तिदाकर्ण्णनाली ॥ कालीभगाघोररूपाभगाङ्गीभ गाह्वाभगप्रीतिदाभीमरूपा॥भवानीमहाकौशिकीकोशपूर्ण्णा कि शोरीकिशोरप्रियानन्दईहा॥महाकारणाकारणाकर्म्मशीला कपा लीप्रसिद्धामहासिद्धखण्डा ॥ मकारप्रियामानरूपामहेशी महोल्का सिनीलास्यलीलालयाङ्गी ॥ क्षमाक्षेमशीलाक्षपाकारिणी चाक्षयप्रीतिदाभूतियुक्ताभवानी ॥ भवाराधिताभूतिसत्यात्मिका चप्रभोद्भासिताभानुभास्वत्कराच ॥ धराधीशमाताधना गारदृष्टिर्द्धनेशार्च्चिताधीवराधीवराङ्गी ॥ प्रकृष्टाप्रभारूपिणीप्राण रूपा प्रकृष्टस्वरूपास्वरूपप्रियाच ॥ चलत्कुण्डलाकामिनीका न्तयुक्ता कपालाचलाकालकोद्धारिणीच ॥ कदम्बप्रियाकोटरी कोटदेहा क्रमाकीर्त्तिदाकर्ण्णरूपाचकाक्ष्मी ॥ क्षमाङ्गीक्षयप्रेमरू पाक्षपाच क्षयाक्षाक्षयाह्वाक्षयप्रान्तराच ॥ क्षवत्कामिनीक्षारिणी क्षीरपूषाशिवाङ्गीचशाकम्भरीशाकदेहा ॥ महाशाकयज्ञाफलप्रा शकाचशकाह्वाशकाह्वाशकाख्याशकाच ॥ शकाक्षान्तरोषासुरो

षासुरेखामहाशेषयज्ञोपवीतप्रियाच॥ जयन्तीजयाजाग्रतीयोग्य रूपाजयाङ्गजपध्यानसन्तुष्टसञ्ज्ञा ॥ जयप्राणरूपाजयस्वर्ण्ण देहाजयज्वालिनीयामिनीयाम्यरूपा॥जगन्मातृरूपाजगद्रक्षणा चस्वधावौषडन्ताविलम्बाविलम्बा ॥ षडङ्गामहालम्बरूपासि हस्तापदाहारिणीहारिणीहारिणीच॥महामङ्गलामङ्गलप्रेमकीर्त्ति र्निशुम्भक्षिदाशुम्भदर्प्पत्वहाच ॥ तथानन्दबीजादिमुक्तस्वरू पातथाचण्डमुण्डापदामुख्यचण्डा ॥ प्रचण्डाप्रचण्डामहाचण्डवे गाचलज्जामरा चामराचन्द्रकीर्त्तिः ॥सुचामीकराचित्रभूषोज्ज्वला ङ्गीसुसङ्गीतगीतश्चपायादपायात्॥ इतितेकथितन्देविनाम्नामष्टो त्तरंशतम् ॥ गोप्यञ्चसर्व्वतन्त्रेषुगोपनीयञ्चसर्व्वदा ॥ एतस्यस ताभ्यासात्साक्षादेवोमहेश्वरः॥ त्रिसन्ध्यञ्चमहाभक्त्यापठनीयं सुखोदयम् ॥ नतस्यदुष्करङ्किञ्चिज्जायतेस्पर्शतःक्षणात् ॥ स्व कृतय्यँत्तदेवातन्तस्मादावर्त्तयेत्सदा॥ सदैवसन्निधौतस्यदेवीवस तिसादरम् ॥ अयोगायेतएवाग्रेसुयोगाश्चभवन्तिवै ॥ तएवमित्र भूताश्चभवन्तितत्प्रसादतः ॥ विषाणिनोपसर्प्पन्तिव्याधयोन स्पृशन्तितान् ॥ लूताविस्फोटकास्सर्व्वेशमय्यँान्तिचतत्क्षणात्॥ जरापलितनिर्म्मुक्तःकल्पजीवीभवेन्नरः ॥ अपिकिम्बहुनोक्तेनसा न्निध्यम्फलमाप्नुयात॥यावन्मयापुराप्रोक्तम्फलंसाहस्रनामकम् ॥ तत्सर्व्वंलभतेमर्त्त्यो महामायाप्रसादतः ॥ इतिश्रीरुद्रयामलेमात ङ्गीशतनामस्तोत्रंसम्पूर्णम् ॥

अथसहस्रनाम।

ईश्वरउवाच॥शृणुदेविप्रवक्ष्यामिसाम्प्रतन्तत्त्वतःपरम्॥नाम्नां सहस्रम्परमंसुमुख्याःसिद्धयेहितम् ॥ सहस्रनामपाठीयःसर्व्वत्रवि जयीभवेत् ॥ पराभवोनतस्यास्ति सभायाञ्चामहारणे ॥ यथातु

ष्टाभवेद्देवी सुमुखीचास्यपाठतः ॥ तथाभवतिदेवेशि साधकः शिवएवसः ॥ अश्वमेधसहस्राणि वाजपेयस्यकोटयः ॥ सकृत्पाठेनजायन्तेप्रसन्नासुमुखीभवेत् ॥ मतङ्गोऽस्यऋषिश्छन्दोऽनुष्टुब्देवीसमीरिता ॥ सुमुखीविनियोगः स्यात्सर्व्वसम्पत्तिहेतवे ॥एवन्ध्यात्वापठेदेतद्यदीच्छेत्सिद्धिमात्मनः ॥ देवीषोडशवार्ष्किंशवगताम्माध्वीरसाधूर्ण्णतां श्यामाङ्गीमरुणाम्बराम्पृथुकुचाङ्कुञ्जावलीशोभिताम् ॥ हस्ताभ्यान्दधतीङ्कपालममलन्तीक्ष्णान्तथाकर्त्रिकान्ध्यायेन्मानसपङ्कजेभगवतीमुच्छिष्टचाण्डालिनीम् ॥ ॐसुमुखीशेमुपीसेव्यासुरसाशशिशेखरा ॥समानास्यासाधनीचसमस्तसुरसन्मुखी।सर्व्वसम्पत्तिजननीसम्मदासिन्धुसेविनी ॥शम्भुसीमन्तिनीसौम्या समाराध्यासुधारसा॥ सारङ्गासवलीवेलालावण्यवनमालिनी॥वनजाक्षीवनचरीवनीवनविनोदिनी॥ वेगिनीवेगदावेगा वगलस्थावलाधिका ॥कालीकालप्रियाकेलीकमलाकालकामिनी ॥कमलाकमलस्थाच कमलस्थाकलावती॥ कुलीनाकुटिलाकान्ता कोकिलाकलभाषिणी ॥ कीराकेलिकराकाली कपालिन्यपिकालिका ॥ केशिनीचकुशावर्त्ताकौशाम्भीकेशवप्रिया ॥ कालीकाशीमहाकालसङ्काशाकेशदायिनी ॥ कुण्डलाचकुलस्थाच कुण्डलाङ्गदमण्डिता ॥ कुण्डपद्माकुमुदिनी कुमुदप्रीतिवर्द्धिनी ॥ कुण्डप्रियाकुण्डरुचिः कुरङ्गनयनाकुला ॥ कुन्दबिम्बालिनदनीकुसुम्भकुसुमाकरा॥ काञ्चीकनकशोभाढ्याक्वणत्किङ्किणिकाकटिः ॥ कठोरकरणाकाष्ठा कौमुदीकण्डवत्यपि ॥ कपर्द्दिनीकपटिनी कठिनीकलकण्डिनी ॥ कीरहस्ताकुमारीच कुरूढकुसुमप्रिया ॥ कुञ्जरस्थाकुजरताकुम्भीकुम्भस्तनीकला ॥ कुम्भीकाङ्गकरभोरूःकदलीकुशशायिनी॥कुपिताकोटरस्थाच कङ्कालीकन्दलालया॥ कपालवासिनीकेशीक

म्पमानशिरोरुद्रा ॥ कदम्बरीकदम्बस्था कुङ्कुमप्रेमधारिणी॥कुटु म्बिनीकृपायुक्ता ऋतुरूक्तुकरप्रिया ॥ कात्यायनीकृत्तिकाचका र्त्तिकीकुशवर्त्तिनी ॥ कामपत्नीकामदात्री कामेशीकामवन्दिता॥ कामरूपाकामरतिरूकामाख्याज्ञानमोहिनी ॥ खड्गिनीखेचरीख ञ्जाखञ्जरीटेक्षणाखगा ॥ खरगाखरनादाच खरस्थाखेलनप्रिया॥ खरांशुःखेलनीखट्वाखराखट्वाङ्गधारिणी ॥ खरखण्डिन्यपिख्या तिः खण्डिताखण्डनप्रिया ॥ खण्डप्रियाखण्डखाद्याखण्डसिन्धु श्चखण्डिनी ॥ गङ्गागोदावरीगौरी गोतम्यपिचगौतमी ॥ गङ्गा गयागगनगा गारुडीगरुडध्वजा॥गीतागीतप्रियागेया गुणप्रीति र्गुरुर्गिरिः॥ गौर्गौरीगण्डसदनागोकुलागोरूप्रतारिणी ॥ गोत्ता गोविन्दिनीगूढागूढविश्रस्तगुञ्जिनी॥गजगागोपिनीगोपीगोक्षाज यप्रियागणा ॥ गिरिभूपालदुहिता गोगागोकुलवासिनी ॥ घन स्तनीघनरुचिर्घनोरुर्घनानिस्स्वना ॥ घुङ्कारिणी घुक्षकरी घूघूकपरिवारिता ॥ घण्टानादप्रियाघण्टाघोटाघोटकवाहिनी ॥ घोररूपाचघोराचघृतप्रीतिरघृताञ्जनी ॥ घृताचीघृतवृष्टिश्चव ण्टाघटघटावृता ॥ घटस्थाघटनाघातकरीघातनिवारिणी ॥ च ञ्चरीकीचकोरीच चामुण्डाचीरधारिणी ॥ चातुरीचपलाचञ्चु श्चिताचिन्तामणिस्थिता ॥ चातुर्व्वर्ण्यमयीचञ्चुश्चोराचार्य्या चमत्कृतिः ॥ चक्रवर्त्तिवधूश्चित्रा चक्राङ्गीचक्रमोदिनी ॥ चे तश्चरीचित्तवृत्तिश्चेतनाचेतनप्रिया ॥ चापिनीचम्पकप्रीतिश्च ण्डाचण्डालवासिनी ॥ चिरञ्जीविनीतच्चिन्ताचिच्चामूलनिवा सिनी ॥ छूरिकाछत्रमध्यस्थाछिन्दाछिन्दकरीछिदा ॥ छुच्छु न्दरीछलप्रीतिरूछुच्छुन्दरनिभस्वना।छलिनीछत्रदाछिन्नाछिण्टि च्छेदकरीछटा ॥ छन्निनीछान्दसीछायाछरूछन्दाकरीत्यपि ॥ जयदाजयदाजातीजायिनीजामलाजतुः ॥ जम्बूप्रियाजीवनस्था

जङ्गमाजङ्गमप्रिया ॥ जवापुष्पप्रियाजप्याजगज्जीवाजगज्जनिः ॥ जगज्जन्तुप्रधानाचजगज्जीवपराजवा ॥ जातिप्रियाजीवनस्थाजी मूतसदृशीरुचिः॥ जन्याजनहिताजायाजन्मभूर्जन्मभसीजभूः॥ज यदाजगदावासाजायिनीज्वरकृच्छ्रजित् ॥ जपाचजपतीजप्याज पार्हाजायिनीजना ॥ जालन्धरमयीजानुर्ज्जालौकाजाप्यभूषणा॥ जगज्जीवमयीजीवाजरत्कारुर्ज्जनप्रिया ॥ जगतीजननिरताजग च्छोभाकरीजवा ॥ जगतीत्राणकृज्जङ्घाजातीफलविनोदिनी ॥ जातीपुष्पप्रियाज्वालाजातिहाजातिरूपिणी ॥ जीमूतवाहनरु चिर्ज्जीमूताजीर्ण्णवस्त्रकृत् ॥ जीर्ण्णवस्त्रधराजीर्ण्णाज्वलतीजाल नाशिनी ॥ जगत्क्षोभकरीजातिर्ज्जगत्क्षोभविनाशिनी ॥जनापवा दाजीवाचजननीगृहवासिनी ॥ जनानुरागाजानुस्थाजलवासाज लार्त्तिकृत्॥ जलजाजलवेलाचजलचक्रनिवासिनी॥जलमुक्ताज लारोहाजलजाजलजेक्षणा ॥ जलप्रियाजलौकाचजलांशोभवती तथा ॥ जलविस्फूर्ज्जितवपुर्ज्ज्वलत्पावकशोभिनी ॥ झिञ्झाझि ल्लमयीझिञ्झाझणत्कारकरीजया ॥ झञ्झीझम्पकरीझम्पाझम्प त्रासनिवारिणी ॥ टङ्कारस्थाटङ्करीटङ्कारकरणांहसा॥ टङ्कारो ट्टकृतष्टीवाडिण्डीरवसनावृता ॥ डाकिनीडामरीचैवडिण्डिमध्व निनादिनी ॥ डकारनिस्स्वनरुचिस्तापिनीतापिनीतथा ॥ तरु णीतुन्दिलातुन्दातामसीचतमःप्रिया ॥ ताम्राताम्रवतीतन्तुस्तु न्दिलातुलसम्भवा ॥तुलाकोटिस्तुवेगाचतुल्यकामातुलाश्रया ॥तु दिनीतुनिनीतुम्बातुल्यकालातुलाश्रया ॥ तुमुलातुलजातुल्यातु लादानकरीतथा ॥ तुल्यवेगातुल्यगतिस्तुलाकोटिनिनादिनी ॥ ताम्रोष्ठाताम्रपर्ण्णीचतमःसङ्क्षोभकारिणी ॥ त्वरिताज्वरहाती रातारकेशीनमालिनी ॥ तमोदानवतीतामतालस्थानवतीतमी॥ तामसीचतमिस्राचतीव्रातीव्रपराक्रमा ॥ तटस्थातिलतैलाक्ता

तरुणीतपनद्युतिः ॥ तिलोत्तमाचतिलकृत्तारकाधीशशेखरा ॥ तिलपुष्पप्रियातारातारकेशीकुटुम्बिनी ॥ स्थाणुपत्नीस्थिरकरीस्थूलसम्पद्विवर्द्धिनी ॥ स्थितिःस्थैर्य्यस्थविष्ठाचस्थपतिः स्थूलविग्रहा ॥ स्थूलस्थलवतीस्थालीस्थलसङ्गविवर्द्धिनी ॥ दण्डिनीदन्तिनीदामादरिद्रादीनवत्सला॥ देवादेववधूर्दित्या दामिनीदेवभूषणा ॥ दयादमवतीदीनवत्सलादाडिमस्तनी ॥ देवमूर्त्तिकरादैत्यादारिणीदेवतानता ॥ दोलाक्रीडादयालुश्चदम्पतीदेवतामयी ॥ दशादीपस्थितादोषादोषहादोषकारिणी ॥ दुर्ग्गादुर्ग्गार्त्तिशमनीदुर्ग्गम्यादुर्ग्गवासिनी ॥ दुर्ग्गान्धनाशिनी दुःस्थादुःखप्रशमकारिणी ॥ दुर्ग्गन्धादुन्दुभीध्वान्तादूरस्थादूरवासिनी ॥ दरदावरदात्रीचदुर्व्व्यादयितादमी ॥ धुरन्धराधुरीणाचधौरेयीधनदायिनी ॥धीरावाधरित्रीचधर्म्मदाधीरमानसा॥ धनुर्द्धराचधमनीधमनीधूर्त्तविग्रहा ॥ धूम्रवर्णाधूम्रपानाधूमला धूममोदिनी ॥नान्दिनीनान्दिनीनन्दानान्दिनीनन्दवालिका॥नवीनानर्म्मदानर्म्मनेमिर्न्नियमनिस्स्वना॥ निर्म्मलानिगमाधारानिम्नगानिम्नकामिनी ॥ नीलानिरम्बानिर्व्वाणानिर्ल्लोभानिर्गुणानातिः॥ नीलग्रीवानिरीहाचनिरञ्जनजमानवा ॥ निर्गुण्डिकाचनिर्गुण्डानिर्न्नासानासिकाभिधा ॥ पताकिनीपताकाचपत्रप्रीतिःपयस्विनी ॥ पीनापीनस्तनीपत्नीपवनाशीनिशामयी ॥ परापरपराकालीपारकृत्यभुजप्रिया ॥ पवनस्थाचपवनापवनप्रीतिवर्द्धिनी ॥ पशुवृद्धिकरीपुष्पीपोषकापुष्टिवर्द्धिनी ॥ पुष्पिणीपुस्तककरापूर्णिमातलवासिनी ॥ पेशीपाशकरीपाशापांशुहापांशुलापशुः ॥ पटुःपराशापरशुधारिणीपाशिनीतथा ॥ पापघ्नीपतिपत्नीचपतितापतितापती ॥ पिशाचीचपिशाचघ्नीपिशिताशनतोषिणी ॥ पानदापानपात्रीचपानदानकरोद्यता ॥ पेयाम्र

सिद्धापीयूषापूर्णापूर्णमनोरथा ॥ पतङ्गाभापतङ्गाचपौनःपुन्य पिबापरा ॥ पङ्किलापङ्कमग्नाचपानीयापञ्जरस्थिता ॥ पञ्चमी पञ्चयज्ञाचपञ्चतापञ्चमाप्रिया ॥ पिचुमन्दापुण्डरीकापिकीपिङ्ग ललोचना ॥ प्रियङ्गुमञ्जरीपिण्डीपण्डितापाण्डुरप्रभा ॥ प्रेतास नाप्रियालस्था पाण्डुघ्नीपीनसापहा ॥ फलिनीफलदात्रीच फलश्रीःफलभूषणा ॥ फूत्कारकारिणीस्फारीफुल्लाफुल्लाम्बुजान ना ॥ स्फुल्लिंगहास्फीतमतिः स्फीतकीर्त्तिकरीतथा ॥ बालमा यावलारातिर्व्वलिनीबलवर्द्धिनी ॥ वेणुवाद्यावनचरी विरञ्चिज नयत्यपि ॥ विद्याप्रदामहाविद्या बोधिनीबोधदायिनी ॥ बुद्ध माताचबुद्धाचवनमालावतीवरा ॥ वरदावारुणीवीणा वीणावा दनतत्परा ॥ विनोदिनीविनोदस्थाविष्णवीविष्णुवल्लभा ॥ वैद्या वैद्यचिकित्साच विवशाविश्वविश्रुता ॥ विद्यौघविह्वलावेलावि त्तदाविगतज्वरा ॥ विरावाविवरीकाराविम्बोष्टीबिम्बवत्सला ॥ विन्ध्यस्थावरवन्द्याचवीरस्थानवराचवित् ॥ वेदान्तवेद्याविज या विजयाविजयप्रदा ॥ विरोगीवन्दिनीवन्ध्या वन्द्यबन्धनिवा रिणी ॥ भगिनीभगमालाचभवानीभवनाशिनी ॥ भीमाभी माननाभीमाभङ्गुराभीमदर्शना ॥ भिल्लीभिल्लधराभीरुर्भैरुण्डा भीभयावहा ॥ भगसर्प्पिण्यपिभगाभगरूपाभगालया ॥ भगास नाभवाभोगा भेरीझङ्काररञ्जिता ॥ भीषणाभीषाणारावा भगव त्यहिभूषणा ॥ भारद्वाजाभोगदात्री भूतिघ्नीभूतिभूषणा ॥ भूमिदाभूमिदात्रीचभूपतिर्भ्भरदायिनी ॥ भ्रमरीभ्रामरीभाला भूपालकुलसंस्थिता ॥ मातामनोहरामायामानिनीमोहिनीम ही ॥ महालक्ष्मीर्म्मदक्षीबामदिरामदिरालया ॥ मदोद्धतामतङ्ग स्थामाधवीमधुमर्द्दिनी ॥ मोदामोदकरीमेधा मेध्यामध्याधिप स्थिता ॥ मद्यपामांसलोभस्था मोदिनीमैथुनोद्यता ॥ मूर्द्धा

वतीमहामायामायामहिममन्दिरा ॥ महामालामहाविद्या म
हामारीमहेश्वरी ॥ महादेववधूमान्या मथुरामेरुमण्डिता ॥ मे
दस्विनीमिलिन्दाक्षी महिषासुरमर्द्दिनी ॥ मण्डलस्थाभग
स्थाचमदिरारागगर्व्विता ॥ मोक्षदामुण्डमालाच मालामालावि
लासिनी ॥ मातङ्गिनीचमातङ्गीमातङ्गतनयापिच ॥ मधुस्रवाम
धुरसाबन्धूककुसुमप्रिया ॥ यामिनीयामिनीनाथमुखायावकराजि
ता ॥ यवाङ्कुरप्रियायामायवनीयवनार्द्दिनी ॥ यमघ्नीयमकल्पा
च यजमानस्वरूपिणी ॥ यज्ञायज्ञयजुर्य्यक्षीयशोनिःकम्पका
रिणी॥यक्षिणीयक्षजननीयशोदायासधारिणी॥ यशस्सूत्रप्रदाया
मायज्ञकर्म्मकरीत्यपि ॥ यशस्विनीयकारस्था भूयस्तम्भनिवा
सिनी ॥ रञ्जिताराजपत्नीचरमारेखारवीरणा ॥ रजोवतीरजश्चि
त्रारञ्जनीरजनीपतिः ॥ रोगिणीरजनीराज्ञा राज्यदाराज्यवर्द्धि
नी॥राजन्वतीराजनीतिस्तथारजतवासिनी ॥ रमणीरमणीया
चरामारामावतीरतिः ॥ रेतोरतीरतोत्साहारोगघ्नीरोगकारिणी ॥
रङ्गारङ्गवतीरागा रागज्ञारागकृदया ॥ रामिकारजकीरेवा रज
नीरङ्गलोचना ॥ रक्तचर्म्मधरारङ्गी रङ्गस्थारङ्गवाहिनी ॥ रमा
रम्भाफलप्रीती रम्भोरूरावणप्रिया॥रङ्गारङ्गाङ्गमधुरारोदसीचम
हारवा ॥ रोधकृद्रोगहन्त्रीचरूपभृद्रोगस्राविणी ॥ बन्दीबन्दि
स्तुताबन्धुर्ब्बन्धूककुसुमाधरा ॥ वन्दितावन्द्यमानाच वैद्रावीवे
दविद्विधा ॥ विकोपाविकपालाच विङ्कस्थाविङ्कवत्सला ॥
वेदैर्व्विलग्नलग्नाचविधिविङ्ककरीविधा ॥ शङ्खिनीशङ्खवलया
शङ्खमालावतीशमी ॥ शङ्खपात्राशिनीशङ्खस्वनशङ्खगलाश
शी ॥ शबरीशाम्बरीशम्भुःशम्भुकेशाशरासिनी ॥ शवाश्येनव
तीश्यामा श्यामाङ्गीश्यामलोचना ॥ श्मशानस्थाश्मशानाच
श्मशानस्थानभूषणा ॥ शमदाशमहन्त्रीचशङ्खिनीशङ्खरोषरा ॥

शान्तिश्शान्तिप्रदाशेषा शेषाख्याशेषशायिनी ॥ शेमुषीशोषिणीशेषाशौर्य्याशौर्य्यशराशरी ॥ शापदाशापहाशापाशापपन्थासदाशिवा ॥ शृङ्गिणीशृङ्गिपलभुक्शाङ्करीशाङ्करीशिवा॥शवस्थाशवभुक्शान्ताशवकर्ण्णाशवोदरी ॥ शाविनीशर्वाशशाश्रीः शवाचशमशायिनी ॥ शवकुण्डलिनीशैवाशीकराशिशिराशिना ॥ शवकाञ्चीशवश्रीका शवमालाशवाकृतिः॥सवन्तीसङ्कचाशक्तिश्शन्तनुश्शवदायिनी ॥ सिन्धुस्सरस्वतीसिन्धुस्सुन्दरीसुन्दराननना ॥ साधुःस्सिद्धिप्रदात्रीचसिद्धासिद्धसरस्वती॥सन्ततिस्सम्पदासर्व्वच्छङ्किसम्पत्तिदायिनी॥ सपत्नीसरसासारासारस्वतकरीसुधा ॥ सुरासमांसाशनाच समाराध्यासमस्तदा ॥समर्धीस्सामदासीमासम्मोहासमदर्शना॥सामतिस्सामधासीमा सावित्रीसविधासती ॥ सवनासवनासारा सवरासावरासमी ॥ सिमरा सततासाध्वीसध्रीचीससहायिनी ॥ हंसीहंसगतिर्हंसीहंसोज्ज्वलनिचोलयुक् ॥ हलिनीहालिनीहालाहलश्रीर्हरवल्लभा ॥ हलाहलवतीह्येषाहेलाहर्षविवर्द्धिनी ॥ हन्तिर्हन्ताहयाहाहाहताहन्तातिकारिणी ॥ हङ्कारीहङ्कृतिर्हङ्का हीहीहाहाहिताहिता ॥ हीतिर्हेमप्रदाहारारावणीहरिसम्मता॥ होराहोत्रीहोलिकाच होमाहोमहविर्हविः ॥ हरिणीहरिणीनेत्राहिमाचलनिवासिनी ॥ लम्बोदरीलम्बकर्ण्णा लम्बिकालम्बविग्रहा ॥ लीलालीलावतीलोलाललनाललितालता ॥ ललामलोचनालोम्यालोलाक्षीसत्कुलालया ॥ लपत्नोलपतीलम्पालोपामुद्राललन्तिका ॥ लतिकालङ्घिनीलङ्घालालिमालघुमध्यमा ॥ लघीयसीलघूदर्य्यालूतालूताविनाशिनी ॥ लोमशालोमलम्बीचलुलन्तीचलुलम्पती ॥ लुलायस्थावलहरीलङ्कापुरपुरन्दरा ॥ लक्ष्मीर्ल्लक्ष्मीप्रदालभ्यालाक्षाक्षीलुलितप्रभा ॥ क्षणाक्षणक्षुक्षुक्षिणीक्षमाक्षा

न्ति×क्षमावती ॥ क्षामाक्षामोदरीक्षेम्या क्षौमभृत्क्षात्रियाङ्गणा ॥ क्षयाक्षायाकरीक्षीराक्षीरदाक्षीरसागरा ॥ क्षेमङ्करीक्षय करीक्षयकृत्क्षणदाक्षतिः ॥ क्षुद्रिकाक्षुद्रिकाक्षुद्राक्षुत्क्षमाक्षीण पातका ॥ मातुःसहस्रनामेदंसुमुख्यास्सिद्धिदायकम् ॥ य×पठे त्प्रयतोनित्यंसएवस्यान्महेश्वरः ॥ अनाचारात्पठेन्नित्यन्दरिद्रो धनवान्भवेत् ॥ मूकस्स्याद्वाक्पतिर्देविरोगीनीरोगताव्व्रजेत् ॥ पुत्रार्थीपुत्रमाप्नोतित्रिषुलोकेषुविश्रुतम् ॥ वन्ध्यापिसूयतेपुत्रँव्वि दुषस्सदृशङ्गरोः ॥ सत्यञ्चबहुधाभूयाद्भावश्चबहुदुग्धदाः ॥ राजा न×पादनम्रास्स्युस्तस्यहासाइवस्फुटाः ॥ अरयस्सङ्क्षयँय्यान्ति मनसासंस्मृताअपि ॥ दर्शनादेवजायन्तेनरानार्य्योपितद्वशाः॥ कर्त्ताहर्त्तास्वयँव्वीरोजायतेनात्रसंशयः ॥ यँय्यङ्कामयतेकामन्त न्तमाप्नोतिनिश्चितम् ॥ दुरितन्नचतस्यास्तिनास्तिशोक×कथञ्च न ॥ चतुष्पथेऽर्द्धरात्रेचय×पठेत्साधकोत्तमः ॥ एकाकीनिर्भयो वीरोदशावर्त्तस्तवोत्तमम् ॥ मनसाचिन्तितङ्कार्य्यंतस्यसिद्धिर्न्न संशयः ॥ विनासहस्रनाम्नाँय्योजपेन्मन्त्रङ्कदाचन ॥ नासिद्धिर्ज्जा यतेतस्यमन्त्रङ्कल्पशतैरपि ॥ कुजवारेश्मशानेवाम्मध्याह्नेयोज पेत्सदा ॥ कृतकृत्यस्सजायेतकर्त्ताहर्त्तानृणामिह ॥ रोगात्तोर्द्ध निशायाँय्य×पठेदासनसंस्थितः ॥ सद्योनीरोगतामेति यदिस्या न्निर्भयस्तदा ॥ अर्द्धरात्रेश्मशानेवाशनिवारेजपेन्मनुम् ॥ अष्टो त्तरसहस्रन्तुदशवारञ्जपेत्ततः ॥ सहस्रनामचैतद्धितदायातिस्व यंशिवा ॥ महापवनरूपेणघोरगोमायुनादिनी ॥ ततोयदिन भीतिःस्यात्तदादेहीतिवाग्भवेत् ॥ तदापशुबलिन्दद्यात्स्वयङ्कृ ह्वा तिचण्डिका ॥ यथेष्टञ्चवरन्दत्त्वाप्रयातिसुमुखीशिवा ॥ रोचना गुरुकस्तूरीकर्प्पूरैश्चसचन्दनैः ॥ कुङ्कुमेनादिनेश्रेष्ठे लिखित्वा भू र्ज्जपत्रके ॥ शुभनक्षत्रयोगेचकृतमारुतसक्रियः ॥ कृत्वासम्पा

तनविधिन्धारयेद्दक्षिणेकरे ॥ सहस्रनामस्वर्ण्णस्थङ्कण्ठेवाविजितेन्द्रियः ॥ तदायम्प्रणमेन्मन्त्रीक्रुद्धस्साम्रियतेनरः ॥ दुष्टश्वापदजन्तूनान्नभीरुकुत्रापिजायते ॥ बालकानामियंरक्षागर्ब्भिणीनामपिप्रिये ॥ मोहनस्तम्भनाकर्षमारणोच्चाटनानिच ॥ यन्त्रधारणतोनूनञ्जायन्तेसाधकस्यतु ॥ नीलवस्त्रेविलिखितेध्वजायाय्यँदितिष्ठति ॥ तदानष्टाभवत्येव प्रचण्डाप्यरिवाहिनी ॥ एतज्जप्तम्महाभस्मललाटेयदिधारयेत् ॥ तद्विलोकनएवस्युरप्राणिनस्तस्यकिङ्कराः ॥ राजपत्न्योपिविवशाःकिमन्याःपुरयोषितः ॥ एतज्जप्तम्पिवेत्तोयम्मासेनस्यान्महाकविः ॥ पण्डितश्चमहावादीजायतेनात्रसंशयः ॥ अयुतञ्चपठेत्स्तोत्रम्पुरश्चरणसिद्धये ॥ दशांशङ्कमलैर्हुत्वात्रिमध्वाक्तैर्व्विधानतः ॥ स्वयमायातिकमलावाण्यासहतदालये ॥ मन्त्रोनिःकीलतामेति सुमुखीसुमुखीभवेत् ॥ अनन्तञ्चभवेत्पुण्यमपुण्यञ्चक्षयव्व्रजेत् ॥ पुष्करादिषुतीर्त्थेषु स्नानतोयत्फलम्भवेत् ॥ तत्फलँल्लभतेजन्तुः सुमुख्याःस्तोत्रपाठतः ॥ एतदुक्तंरहस्यन्तेस्वसर्व्वस्वव्वरानने ॥ नप्रकाश्यन्त्वयादेवि यदिसिद्धिञ्चविन्दसि॥ प्रकाशनादसिद्धिस्स्यात्कुपिता सुमुखीभवेत् ॥ नातःपरतरोलोकेसिद्धिदःप्राणिनामिह ॥ वन्देश्रीसुमुखीम्प्रसन्नवदनाम्पूर्ण्णेन्दुबिम्बाननांसिन्दूराङ्कितमस्तकाम्मधुमदोल्लोलाञ्चमुक्तावलीम् ॥ श्यामाङ्कञ्चलिकाकराङ्करगतञ्चाध्यापयन्तींशुकङ्कुञ्जापुञ्जविभूषणांसकरुणामामुक्तवेणीलताम् ॥ इतिश्रीनन्द्यावर्त्ततन्त्रे उत्तरखण्डेमातङ्गीसहस्रनामस्तोत्रंसम्पूर्ण्णम् ॥ ॥ ॥ ॥ ॥

इति शाक्तप्रमोदे मातङ्गीतन्त्रं समाप्तम् ।